# संस्कृत-वार्ता:

दिनाङ्क :- 30/12/2025 सायम् - 06:20

## आदौ मुख्यवार्ता:

- प्रधानमन्त्री नरेन्द्रमोदी अवोचत् यत् भारतं रिफॉर्म एक्सप्रेस इति दोषनिवृत्ति पथे अग्रेसरं वर्तते। येन भारतं जगतः केन्द्रत्वं वर्तते।
- केन्द्रीय-जलशक्ति-मन्त्री सी. आर. पाटिलः अद्य जल-जीवन-अभियानस्य अन्तर्गतं सेवा-वितरणस्य सामुदायिक-स्वामित्वस्य च सुदृढीकरणाय जल-सेवा-मूल्याङ्कनम् आभासीय-माध्यमेन उद्घाटितवान्।
- बांग्लादेशस्य पूर्व-प्रधानमन्त्री बीएनपी इति दलस्य अध्यक्षा खालिदा जिया ढाकायां पंचत्वे निलीना। प्रधानमंत्री नरेन्द्रमोदी तस्या: निधने शोकं प्रकटितवान्।
- क्रिकेट्-क्रीडायां भारत-श्रीलङ्कादलयोः विंशतिं प्रतिविंशतिः स्पर्धामालिकायाः पञ्चमान्तिम-स्पर्धा अद्य भविष्यति।

## प्रधानमन्त्री- रिफॉर्म एक्सप्रेस

प्रधानमन्त्री नरेन्द्रमोदी अवोचत् यत् भारतं रिफॉर्म एक्सप्रेस इति दोषनिवृत्ति पथे अग्रेसरं वर्तते। येन भारतं जगतः केन्द्रत्वं वर्तते। प्रधानमन्त्रिणा नरेन्द्रमोदिना अद्य ऐषमः 'रिफॉर्म एक्सप्रेस इति विषये सोशल मीडिया इति सामाजिकसञ्चार-पटले एको लेखः लिखितः। अस्मिन् लेखे शासनस्य तेषां सञ्चयी कार्याणां विवरणं प्रस्तुतं यैः शनैः शनैः बाधाः निराकृताः। श्री मोदी अवदत् यत् पञ्चविंशत्युत्तर-द्विसहस्रतमे वर्षे भारतेन श्रमविधै व्यापार-सन्धौ ऊर्जायाम् अन्येषु क्षेत्रेषु च देशस्य विकासगाथा विश्वसनीयता स्थिरता दीर्घकालिक-विश्वासः च दृष्टिङ्गताः। प्रधानमन्त्री अवदत् यत् एते पदक्षेपाः सप्तचत्वारिंशदुत्तर-द्विसहस्रतम-वर्षं यावत् विकसितभारतनिर्माणे सहायकाः भविष्यति।

## प्रधानमन्त्री आर्थशास्त्रिणः

प्रधानमन्त्री नरेन्द्रमोदी अद्य नीति-आयोगे आगामी वर्षस्य आय-व्यय संकल्पना-पत्रम् आलक्ष्य देशस्य अर्थक्षेत्रविशेषज्ञैः सह उपवेशनम् अकरोत्। इदम् उपवेशनम् अर्थिकक्षेत्रविशेषज्ञाणां विचारानुभवानाम् आधारेण वर्तमानार्थिक-स्थितिम् अवलोक्य भावि

संभावनायै अवर्तत। अस्मिन् उपवेशने विकासं समेधितुं दोषनिवृत्तये च विचारविमर्शो विहितः। नीति आयोगे विहिता परिचर्चा प्रशासनाय भावियोजना निर्माणे साहाय्यं प्रदास्यति।

## जल-जीवन-अभियानम्

केन्द्रीय-जलशक्ति-मन्त्री श्री सी. आर. पाटिलः अद्य जल-जीवन-अभियानस्य अन्तर्गतं सेवा-वितरणस्य सामुदायिक-स्वामित्वस्य च सुदृढीकरणाय जल-सेवा-मूल्याङ्कनं वर्चुअल-माध्यमेन उद्घाटितवान्। जलशक्ति-मन्त्रालयेन उक्तं यत् जल-सेवा-मूल्याङ्कनं जल-जीवन-अभियान-पटले ग्राम-पञ्चायत-नेतृत्वे डिजिटल-पेयजल-सेवा-कार्यक्षमता-मूल्याङ्कनस्य साधनं वर्तते। एतत् समुदाय-स्वामित्वस्य स्व-मूल्याङ्कन-रूपेण परिकल्पितम् अस्ति, यत् पुनरावर्तित-मूल्य-तृतीय-पक्ष-सर्वेक्षणेषु अवलम्बनात् परं ग्रामिण-स्वजल-सेवा-वितरण-व्यवस्थायाः विषये सामूहिक-चिन्तनाय साहाय्यं करिष्यति। अग्रिमे वर्षे जनवरी-मासस्य षड्विंशतितमे दिनाङ्के “हर-घर-जल” इति योजना ग्रामेषु प्रापयेत इति अपेक्ष्यते। अस्मिन् अवसरे श्री पाटिलः अवदत् यत् जल-सेवा-मूल्याङ्कनेन ग्राम-पञ्चायताः जलापूर्ति-व्यवस्थायाः संरक्षकाः भवितुं समर्थाः भविष्यन्ति। येन ग्राम-सभायाः माध्यमेन लोकतान्त्रिक-निर्णय-प्रक्रियायाः सुदृढीकरणे साहाय्यं भविष्यति।

## बांग्लादेशः

बांग्लादेशस्य पूर्व-प्रधानमन्त्री बीएनपी इति दलस्य अध्यक्षा खालिदा जिया ढाकायां पंचत्वे निलीना। प्रधानमंत्री नरेन्द्रमोदी तस्या: निधने शोकं प्रकटितवान्। खालिदा जिया अशीति- वर्षीया आसीत्। एकस्मिन् सामाजिकसंचार-पटले बीएनपी इति दलेन लिखितं यत् प्रशासनेतर-चिकित्सालये सा उपचर्यमाणा आसीत्।

## डॉ.जितेन्द्र-सिंहः

कार्मिक-लोक-परिवाद-निवृत्तिवेतन-राज्यमन्त्री डॉ. जितेन्द्र-सिंहः अवदत् यत् पञ्चविंशत्यधिक-द्विसहस्रतमवर्षं जीवनात्मककार्यस्य च सौविध्याय शासनात्मक-परिष्काराय

च समर्पितम् अस्ति। अद्य नवदिल्ल्यां वर्षान्त-वार्ताहर-सम्मेलनं सम्बोधयन् मन्त्री अवदत् यत् नागरिक-जीवनस्य सुगमतां सुनिश्चेतुं सेवाप्रदातॄणां कार्य-सौकर्यस्य सुनिश्चितिः अनिवार्या अस्ति। मन्त्रिणा वृत्ति-मेलापकं केन्द्रीकृत-सार्वजनिक-अभियोग-निवारण-निरीक्षण-व्यवस्था इत्यादीनां विभागानां प्रमुखोपक्रमाणाम् उपलब्धीनां विषये अवधानं दत्तम्। कार्मिक-प्रशिक्षण-विभागस्य सचिवः रचना-शाहः अवदत् यत् पञ्चविंशत्यधिक-द्विसहस्रतमे वर्षे त्रयः राष्ट्रियोजीविकोत्सवाः आयोजिताः। येषु विभिन्नैः मन्त्रालयैः विभागैश्च प्रायः सार्ध-लक्षं नियुक्ति-पत्राणि वितरितानि। संघ-लोक-सेवा-आयोगस्य प्रतिभा-सेतु-अभियानस्य उल्लेखं कुर्वन् सः सूचितवान् यत् त्र्यशीत्यधिक-द्विसहस्र-संस्थानां कृते त्रयोदश-सहस्रादधिकानाम् अनुशंसित-अभ्यर्थिनां विवरणानि उपलभ्यन्ते, अथ च एकसप्तत्यधिकचतुर्शतम् अभ्यर्थिभ्यः नियुक्ति-पत्राणि प्रदत्तानि।

<u>भारतीयार्थव्यवस्था</u>

अर्न्स्ट एंड यंग इति अन्तर्राष्ट्रिय-मानाङ्कनाभिकरणस्य प्रतिवेदनानुसारं भारतं सप्तचत्वारिंशदुत्तर-द्विसहस्र-अष्टचत्वारिंशदुत्तर-द्विसहस्रवर्षं च यावत् षड् विंशतिः खर्बुद डॉलर् मितार्थव्यवस्था भवितुं शक्नोति। प्रतिवेदने प्रतिव्यक्तेः आयः षड्गुणाधिकमितायाः अनुमानं प्रकटितम्। त्रिंशदुत्तर-द्वि-सहस्र-तम-वर्षं यावत् अमरीका चीनयोः अनन्तरं जगतः तृतीयः सर्वतो बृहत् अर्थव्यवस्थायाः क्रमे भारतं जर्मनी जापानाभ्याम् अग्रे गमिष्यति इति आशा वर्तते। जगतः पञ्चम सर्वतो बृहत् अर्थव्यवस्था भवितुं भारतं पूर्वमेव महत्त्वपूर्णं विदधाति। अयं हि भारतस्य आर्थिकोदारीकरण-नीतीनां परिणामो विद्यते। प्रतिवेदने इदमपि उक्तं यत् आगामि-दशकेषु भारतस्य विकासानुमानं प्रमुख-वैश्विकार्थव्यवस्थासु सर्वाधिकं भविष्यति।

<u>उपराष्ट्रपतिः</u>

उपराष्ट्रपतिः सी.पी.राधाकृष्णनः अवोचत् यत् श्रीनारायणगुरोः शिक्षा भविष्याम् अपि जनानान् प्रेरयिष्यति। उपराष्ट्रपतिः अद्य केरलस्य वरकालायां त्रिनवतितमायाः शिवगिरि तीर्थयात्रायाः उद्घाटनावसरे वदति स्म। इतः प्राक् केरलस्य तिरूवनंतपुरम-नगरे

मार इवोनियोस इत्याख्यास्य स्वायत्त महाविद्यालयस्य हीरकजयन्त्यवसरे उपराष्ट्रपतिः अवोचत् यत् शिक्षा विकसित-भारतनिर्माणे निर्णायक-भूमिकां निभालयति।

## गृहमन्त्री कोलकातायाम्

गृहमन्त्रिणा अमित-शाहेन तृणमूल-कांग्रेस-दलस्य प्रशासने राज्ये व्याप्ताभ्यां भ्रष्टाचार-कुप्रशासनाभ्यां कारणेन पश्चिम-बङ्गालस्य विनाशारोपः समारोपितः। कोलकातायाम् अद्य श्रीशाहेन तृणमूल-कांग्रेसदलं सुरक्षायां विफलमिति समारोपितः। तेनोक्तं यत् पश्चिम-बङ्गालस्य मुख्यमन्त्री ममता बनर्जी अवैधप्रवेशस्य समस्यायाः समाधाने विफला वर्तते। गृहमन्त्री अवोचत् यत् भारतीय-जनता-पार्टीति दलम् आगामि-वर्षे समपत्स्यमाने पश्चिम-बङ्गाल-विधानसभा-निर्वाचने बहुमतेन प्रशासनं रचयिष्यति।

## कृषि-मन्त्री

कृषि-कृषक-कल्याण-मन्त्री शिवराजसिंहचौहानः अवोचत् यत् संसदा वर्तमानावश्यकताः निध्याय मनरेगा-योजनायाः न्यूनताः अपाकर्तुं विकसित भारत– जी राम जी विधेयकं पारितम्। श्रीचौहानः अद्य मध्यप्रदेशस्य भोपालनगरे विकसितभारत रोजगार आजीविका गारंटी मिशन ग्रामीण इति योजनामालक्ष्य वार्ताहर-सम्मेलनं सम्बोधितवान्। विपक्षस्य योजनायाः नाम परिवर्तनारोपे तेनोक्तं यत् अतीतकाले यदा विपक्षी-दलानि प्रशासने आसन् तदा आजीविका-सम्बद्धानां योजनानां नामानि नैकधा परिवर्तितानि। श्रीचौहानः अवदत् यत् विकसित भारत-जी राम जी योजनानाम् इतोपि प्रभावपूर्णां विधातुं प्रधानमन्त्रिणः गति-शक्तिः अभियानेन सह संयोजिता।

## जम्मूकश्मीरे सघनसञ्चेतना

नववर्षम् आलक्ष्य जम्मूकश्मीरे अन्तर्राष्ट्रियसीम्नि सुरक्षाबलानि सघन-सञ्चेतना पुरस्सरं नियोजितानि। अवकाशावधौ सीमापारतः अवैधप्रवेशम् अवाञ्छनीय-स्थितिं च अपाकर्तुं सर्वतोदृशा प्रयासाः विधीयन्ते।

## क्रिकेट्

महिलानां क्रिकेट्-क्रीडायां भारत-श्रीलङ्कादलयोः विंशतिं प्रतिविंशतिः स्पर्धामालिकायाः पञ्चमान्तिम-स्पर्धा अद्य भविष्यति। भारतीय-समयानुसारेण इयं स्पर्धा

सायं सप्तवादने केरलस्य तिरुवनन्त-पुरमस्थिते ग्रीनफील्ड क्रीडाङ्गणे भविष्यति। अस्याः शृङ्खलायाः चतस्रः एव स्पर्धाः भारतेन विजिताः।